# અવતાર ત્રય સ્તોત્ર

પાલયસ્વ નિપાલયસ્વ નિપાલયસ્વ રમાપતે |
વાદિરાજમુનીંદ્રવંદિત વાજિવક્ત્ર નમોઽસ્તુ તે || ૫ |||
મધ્વહૃત્કમલસ્થિતં વરદાયકં કરુણાકરં
લક્ષ્મણાગ્રજમક્ષયં દુરિતક્ષયં કમલેક્ષણમ્ |
રાવણાંતકમવ્યયં વરજાનકીરમણં વિભું
અંજનાસુતપાણિકંજનિષેવિતં પ્રણમામ્યહમ્ || ૧ ||
દેવકીતનયં નિજાર્જુનસારથિં ગરુડધ્વજં
પૂતનાશકટાસુરાદિખલાંતકં પુરુષોત્તમમ્ |
દુષ્ટકંસનિમર્દનં વરરુગ્મિણીપતિમચ્યુતં
ભીમસેનકરાંબુજેન સુસેવિતં પ્રણમામ્યહમ્ || ૨ ||
જ્ઞાનમુક્તિસુભક્તિદં વરબાદરાયણમવ્યયં
કોટિભાસ્કરભાસમાનકિરીટકુંડલમંડિતમ્ |
વાક્સુદર્શનતઃ કલેઃ શિરઘાતકં રમયા યુતં
મધ્વસત્કરકંજપૂજિતમક્ષયં પ્રણમામ્યહમ્ || ૩ ||
|| ઇતિÈશ્રીવાદિરાજપૂજ્યચરણવિરચિતંÈઅવતારત્રયસ્તોત્રમ્È||